# झारखंड - शैक्षिक- अनुसंधान एवं प्रशिक्षण- परिषद्, रांची ।

कक्षा - दशमी　　　　　　　　　　विषयः-संस्कृतम्　　　　　　वार्षिक-परीक्षा-आदर्श-प्रश्न-पत्रम्

बहु- विकल्पात्मकाः **(MCQ)**　　　　　**2022-23** समयः- सार्द्ध-एक-होरा,　**(FM=40)**

*********************************************************************************

सामान्य-निर्देशाः-

1. अस्मिन् प्रश्नपत्रे सर्वे चत्वारिंशत् (40) प्रश्नाः सन्ति।
2. प्रत्येक-प्रश्नस्य कृते चत्वारः विकल्पाः प्रदत्ताः सन्ति।
3. सर्वे प्रश्नाः अनिवार्याः सन्ति ।
4. प्रत्येक-प्रश्नस्य कृते 1-1 अंकः निर्धारितः ।

**खण्ड-क**

**(अपठित-गद्यांशः) (5)**

**निर्देशः - अधोलिखितं गद्यांशं पठित्वा विकल्पेभ्यः उत्तराणि चित्वा लिखन्तु -**

"भारतदेशः प्राचीनकालादेव अहिंसायाः प्रचारम् "अहिंसा परमोधर्मः" इति कथयित्वा कुर्वन्नस्ति। आधुनिके युगे राष्ट्रपिता महात्मागांधी अपि हिंसायाः विरोधे स्वस्वरं गुञ्जितम् अकरोत् अहिंसायाः च प्रचारम् अकरोत्। वास्तवरूपे हिंसा जनान् पशुवत् करोति। अनया जनेषु प्रेम्णः स्नेहस्य च भावना समाप्यते। निस्सन्देहं हिंसा अतीव दुर्गुणरूपे भवति। परं दासता तु तस्याः अपि वीभत्सरूपं वर्तते। कश्चिदपि जनः स्वस्वतन्त्रतां विस्मृत्य सुख-शान्तिपूर्वकं स्वप्तुमपि न शक्यते । यदि कश्चिदपि पक्षी पञ्जरे बद्धयते तर्हि सः बहिः गन्तुं परिपूर्णशक्तया प्रयत्नं करोति उदासीनः दुःखी च भवति। परं मनुष्यः तु विवेकी प्राणी भवति, तस्य समीपे मस्तिष्को हृदयश्च वर्तते अतः सः दासतायाः बन्धनेषु कथं वस्तुं शक्नोति। "

1. अतीव दुर्गुणरूपे का भवति ?

(क) अहिंसा　(ख) हिंसा　(ग) अधिकारः　(घ) सत्यम्

2. प्राचीनकालादेव अहिंसायाः प्रचारम् अकरोत्?

(क) आंग्लदेशः　(ख) अमेरिका-देशः　(ग) पाकिस्तानदेशः　(घ) भारतदेशः

3. हिंसा कान् पशुवत् करोति?

(क) गजान्　(ख) नृपान्　(ग) जनान्　(घ) दुर्गुणान्

4. मनुष्यः कीदृशः प्राणी भवति?

(क) विवेकी (ख) अविवेकी (ग) असभ्यः (घ) बुद्धिहीनः

5. आधुनिकयुगे कः महापुरुषः हिंसायाः विरोधे आसीत् ?

(क) सुभास-चन्द्र-बोसः (ख) जवाहरलाल- नेहरुः (ग) महात्मा गांधी (घ) पटेलः

## खण्ड ख

## पठित-अवबोधनम् (20)

**निर्देशः- अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखन्तु -**

“अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यक- कार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रं ददर्श। सा व्याघ्रं आगच्छन्तं दृष्ट्वा धाष्ट्र्यात् पुत्रौ चपेटया प्रहृत्य जगाद - कथम् एकैकशः व्याघ्रं भक्षणाय कलहं कुरुथः? "

6. किं नाम ग्रामः आसीत्?

(क) देउलाख्यो (ख) कर्णपुरम् (ग) जगतपुरम् (घ) पाटलिपुत्रम्

7. राजपुत्रस्य नाम किम् आसीत्?

(क) देउलाख्यो (ख) गहनकाननं (ग) राजसिंहः (घ) महेन्द्रवीरः

8. बुद्धिमती केन सह पितुर्गृहं प्रति चलिता?

(क) पुत्रद्वयोपेता (ख) राजसिंहेन (ग) राजपुत्रेण (घ) व्याघ्रेण

9. “मार्गे गहनकानने सा एकं व्याघ्रं ददर्श "अत्र क्रियापदं किम् अस्ति?

(क) व्याघ्रं (ख) ददर्श (ग) सा (घ) मार्गे

10. “बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता" अत्र कर्तृ-पदं किम् अस्ति?

(क) बुद्धिमती (ख) पितुर्गृहं (ग) चलिता (घ) पुत्रद्वयोपेता

**निर्देशः- अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखन्तु -**

" दुर्वहमत्र जीवितं जातं प्रकृतिरेव शरणम्। शुचि-पर्यावरणम् ।

महानगरमध्ये चलदनिशं कालायसचक्रम् ।।

मनः शोषयत् तनुः पेषयत् भ्रमति सदा वक्रम् ।

दुर्दान्तैर्दशनैरमुना स्यान्नैव जनग्रसनम्। शुचि... ।"

11. दुर्वहम् अत्र किं जातम्?

(क) जीवितं (ख) शरणम् (ग) प्रकृतिरेव (घ) शुचिः

12. अत्र जीवितं कीदृशं जातम् ?

(क) दुर्वहम् (ख) पर्यावरणम् (ग) प्रकृतिः (घ) चक्रम्

13. अनिशं महानगरमध्ये किं प्रचलति?

(क) प्रकृतिः (ख) कालायसचक्रम् (ग) जीवितं (घ) यानम्

14. किम् शोषयत् सदा वक्रं भ्रमति?

(क) वृक्षम् (ख) जलम् (ग) मनः (घ) चक्रम्

15. "प्रकृतिः एव शरणम् " अत्र अव्यय- पदं किम्?

(क) प्रकृतिः (ख) एव (ग) शरणम् (घ) प्रकृतिरेव

**निर्देशः- नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखन्तु -**

"(सिंहासनस्थः रामः। ततः प्रविशतः विदूषकेन उपदिश्यमानमार्गौ तापसौ कुशलवौ ।)

विदूषकः- इत इत आर्यौ।

कुशलवौ - (रामम् उपसृत्य प्रणम्य च) अपि कुशलं महाराजस्य ?

रामः- युष्मद् दर्शनात् कुशलमिव। भवतोः किं वयम् अत्र कुशल- प्रश्नस्य भाजनम् एव, न पुनः अतिथिजन - समुचितस्य कण्ठाश्लेषस्य। ( परिष्वज्य) अहो हृदयग्राही स्पर्शः। "

16. कुशलवौ कम् उपसृत्य प्रणमतः?

(क) रामम् (ख) विदूषकम् (ग) भरतम् (घ) दशरथम्

17. "इत इत आर्यौ" इति कः कथयति?

(क) रामः (ख) लवः (ग) कुशः (घ) विदूषकः

18. सिंहासनस्थः कः?

(क) दशरथः (ख) रामः (ग) विदूषकः (घ) कुशः

19. "ततः प्रविशतः - - - - तापसौ कुशलवौ" अत्र 'कुशलवौ ' इत्यस्य विशेषणं किम् अस्ति?

(क) तापसौ (ख) ततः (ग) प्रविशतः (घ) विदूषकेन

20. 'अकुशलम् ' इत्यस्य विलोम-पदं किम्?

(क) कुशलम्　(ख) अपि　(ग) दुर्जनम्　(घ) शोभनम्

**निर्देशः- रेखांकितपदेषु प्रश्नवाचक - पदानि विकल्पेभ्यः चित्वा लिखन्तु -**

21. **<u>शरीरस्य</u>** आयासजननं कर्म व्यायामः इति कथ्यते।

(क) केन　(ख) कस्य　(ग) कीदृशः　(घ) कम्

22 **<u>सुराधिपः</u>** ताम् अपृच्छत्।

(क) कस्य　(ख) कः　(ग) कुत्र　(घ) कस्मात्

23. **<u>मनुष्याणां</u>** महान् रिपुः आलस्यम्।

(क) कस्य　(ख) केषाम्　(ग) कथम्　(घ) कति

24. **<u>' पुत्रं</u>** ' द्रष्टुं सः प्रस्थितः।

(क) केन　(ख) कम्　(ग) कुत्र　(घ) कीदृशः

25. न्यायाधीशः **<u>' बंकिमचन्द्रः'</u>** आसीत् ।

(क) कः　(ख) कस्मै　(ग) कम्　(घ) कदा

## ' खण्ड-ग' (अनुप्रयुक्त-व्याकरणम्) (15)

**निर्देशः - अधोलिखित - वाक्येषु रेखांकितपदस्य संधि-पदं विच्छेद- पदं वा चिनुत-**

26. **<u>नास्ति</u>** उद्यम-समः बन्धुः।

(क) नो+अस्ति　(ख) न+अस्ति　(ग) नि+अस्ति　(घ) ने+अस्ति

27. तथापि वृषः **<u>' न +उत्थितः'</u>**

(क) नोत्थितः　(ख) नोउत्थितः　( ग) नावोत्थितः　(घ) नौत्थितः

28. क्षणमपि मे स्यात् **<u>सञ्चरणम्</u>**

(क) सत्+चरणम्　(ख) सम्+चरणम्　(ग) सन्+चरणम्　(घ) स+चरणम्

29. पिता अस्य किं **<u>'तपस्तेपे'</u>**।

(क) तपः+तेपे　(ख) तपस्+तेपे　(ग) तपश्+तेपे　(घ) तपो+तेपे

30. **<u>'तथा+एव'</u>** कार्यं करणीयम्।

(क) तथाएव (ख) तथैव (ग) तथोव (घ) तथाव

**निर्देशः- रेखांकितपदानां प्रकृति- प्रत्ययौ संयोज्य विभाज्य वा विकल्पेभ्यः चिनुत-**

31. **करणीयं** बहिः अन्तर्जगति तु बहुशुद्धीकरणम् ।'

(क) कृ+अनीयर् (ख) क्रा + अनीयर् (ग) करण + अनीयर् (घ)क्री+अनीयर्

32. बुद्धिः **बल+ मतुप्** तन्वि सर्वकार्येषु सर्वदा ।

(क) बलवती (ख) बलवत् (ग) बलमान् (ध) बलुमान्

33. **'गुणी'** गुणं वेत्ति।

(क) गुण+इनि (ख) गुण+टाप् (ग) गुण+क्त (घ) गुण+अनीयर्

34. इयं **'बालक+टाप्'** अस्ति ।

(क) बालिका (ख) बालिकी (ग) बालिके (घ) बालिकम्

35. परिश्रमस्य **'महत्त्वं'** को न जानाति?

(क) महत् +त्व (ख) महत् +टाप् (ग) महत्+ङीप् (घ) महत् +मतुप्

**निर्देशः- उचित-अव्ययपदं विकल्पेभ्यः चिनुत-**

36.------------व्यायमः कर्तव्यः ।

(क) सर्वदा (ख) अन्यथा ( ग) यदा-कदा (घ) अपि

37. सिंहः--------- गर्जति ।

(क) उच्चैः (ख) खलु (ग) च (घ) मा

38. - - - - - - - दशरथः नाम नृपः आसीत्।

(क) अद्य (ख) पुरा (ग) इव (घ) इति

39. त्वम्----------------- गच्छसि ?

(क) इति (ख) उच्चैः (ग) अपि (घ) अन्यथा

40. कुक्कुरः - - - - - - - भ्रमति ।

(क) मा (ख) चित् (ग) विना (घ) इतस्ततः

*************************************************************************************